उत्प्रेक्षा, स्त्री, (उत्प्रेक्ष्यते इति उत्+प्र+ईक्ष+अ+टाप्।) अनवधानम्। इति मेदिनी॥ काव्यालङ्कारविशेषः। तस्य लक्षणम्।
"सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्"।
"अस्यार्थः। प्रकृतस्य उपमेयस्य समेन उपमानेन यत् सम्भावनं मिथ्यात्वेन वर्णनम्"। इति काव्यप्रकाशः॥ (अस्या भेदा बहवः। यदुक्तं साहित्यदर्पणे, दशमपरिच्छेदे। ५६—६२॥
"भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना।
वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता॥
वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः।
जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि॥
तदष्टधापि प्रत्येकं भावाभावाभिमानतः।
गुणक्रियास्वरूपत्वात् निमित्तस्य पुनश्च ताः॥
द्वात्रिंशद्विधतां यान्ति तत्र वाच्याभिदाः पुनः।
विना द्रव्यं त्रिधा सर्व्वाः स्वरूपफलहेतुगाः॥
उक्त्यनुक्त्योर्निमित्तस्य द्विधा तत्र स्वरूपगाः।
प्रतीयमानाभेदाश्च प्रत्येकं फलहेतुगाः॥
उक्त्यनुक्तोः प्रस्तुतस्य प्रत्येकं ता अपि द्विधा।
अलङ्कारान्तरोत्था सा वैचित्र्यमधिकं वहेत्॥
मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः"॥
विस्तृतिस्तु अलङ्कारशब्दे द्रष्टव्या॥)

उत्प्लवनं, क्ली, (उत्+प्लु+ल्युट्।) उल्लम्फनम्। लाफान इति भाषा॥ (यथा, मनुः। ५।११५॥
"द्रवाणाञ्चैव सर्व्वेषां शुद्धिरुत्प्लवनं स्मृतम्"॥)

उत्प्लवा, स्त्री, (उत्+प्लु+अच्+टाप्।) नौका। इति शब्दरत्नावली॥

उत्फालः, पुं, (उत्+फल्+घञ्।) लम्फः॥ ("तत्क्षणं स कृतोत्फालः शक्तिदेवोऽप्यसाध्वसात्"। इति कथासरित्सागरे। २६ तरङ्गे॥)

उत्फुल्लः, त्रि, (उत्फलतीति। उत्+फल्+क्त। आदितश्चेतीड्भावः उत्फुल्लसंफुल्लयोरुपसंख्यानमिति निष्ठातस्य लः।) प्रफुल्लः। विकसितः। इत्यमरः॥ (यथा, किराते।
("उत्फुल्लकमलपरागजन्या-
दुद्भूतः सरसिजसम्भवः परागः"।
स्फीतः। वर्द्धितः। (यथा, विष्णुपुराणे।१।६।१३॥
"हर्षोत्फुल्लकपोलेन न चापि शिरसा धृता"।
आनन्दादिना विस्फारितः। यथा, रामायणे॥
"अवस्थितैः समीपस्थैस्त्रासादुत्फुल्ललोचनैः"।)
स्त्रीणां करणम्। उत्तानम्। इति मेदिनी॥

उत्सः, पुं, (उनत्ति जलेन। उन्द+उन्दिगुधिकुषिभ्यश्चेति सः। किदित्यनुवृत्तेर्न लोपः।) प्रस्रवणम्। इत्यमरः॥ उनइ इति भाषा। यत्र स्थाने सुत्वा जलं गलति तत्र। इति भरतः॥ स्वाम्यादयस्तु अविच्छेदेन स्वच्छजलं यत्र स्थाने पतति निपत्य च बहुलीभवति तत्रेत्याहुः॥ तथा साङ्गोऽप्याह।
"गिरेरुपरि निर्झरादिप्रभवजलसङ्घातः"।
"अजस्रं मन्दवेगेन स्वच्छजले। इति कोक्काटः"॥

उत्सङ्गः, पुं, (उत्सजते मिलति यत्र। उत्+सञ्ज+घञ्।) क्रोड़म्। इति जटाधरः॥
("उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणाम्"॥
इति मेघदूते ८६। तथा, विष्णुपुराणम् १।११।५॥
"प्रणयेनागतं पुत्त्रम् उत्सङ्गारोहणोत्सुकम्"॥
पर्व्वतादीनां शिखरदेशः। सानुः॥ यथा, रघुः।
"शिलाविभङ्गैर्मृगराजशाव-
स्तुङ्गं नगोत्सङ्गमिवारुरोह"॥ ६।३॥
सौधादीनामुपरिभागः। छाद् इति भाषा॥
"सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः"।
इति मेघदूते। २९। अभ्यन्तरभागः।
"वनेचराणां वनितासखानां
दरीगृहोत्सङ्गनिषक्तभासः"।
इति कुमारे। १।१०। ऊर्द्ध्वतलः। वहिर्भागः।
"दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः"।
इति रघुवंशे। ४।७४। सङ्गमः॥ आलिङ्गनम्। विवाहः॥ व्रणाधोभागः। शोथ इति भाषा॥ यथा सुश्रुते। सूत्रस्थाने।
"अभ्यन्तरमुत्सङ्गं कृत्वा भूयोऽपि विकरोति"। गर्भः। यथा, महाभारते परीक्षिज्जन्मनि। १४। ६८।१८।१९॥
"आसीन्मम मतिः कृष्ण! पूर्णोत्सङ्गा जनार्द्दन"!॥)

उत्सर्गः, पुं, (उत्+सृज्+घञ्।) त्यागः। दानम्। वर्ज्जनम्। (यथा, कुमारे। ७।३५॥
"श्रीलक्षणोत्सर्गविनीतवेशाः"।
"तयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः"।
इति मेघदूते। २०॥ यथा, मनुः। ११।१९३।
"तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च"।)
सामान्यविधिः। इति हेमचन्द्रः॥ (यथा, कुमारे। २।२७।
"अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः"।)
सामिककर्त्तव्यक्रियाविशेषः। इति तिथ्यादितत्त्वम्। अथ वैधोत्सर्गविधिः। स्नानसन्ध्याचमनानि कृत्वा नारायणनवग्रहगुरून् संपूज्य देयद्रव्यं वामहस्तेन धृत्वा दक्षिणहस्तेन चिरभ्यर्च्य तद्द्रव्याधिपतिदेवतां सम्प्रदानञ्च अर्च्चयित्वा संकल्प्य कुशतिलजलत्यागपूर्व्वकदानम्। इति स्मृतिः॥
(अपानवायोर्व्यापारः। मलमूत्रादिवर्ज्जनम्॥ उत्सृज्यते विण्मूत्रमनेनेति व्युत्पत्त्या पाय्विन्द्रियम्। यथा,—यथा, मनुः। १२।१२१।
"मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम्।
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम्"॥)

उत्सर्जनं, क्ली, (उत्+सृज्+ल्युट्।) उत्सर्गः। तत्पर्य्यायः। त्यागः १ विहापितं ३ दानं ४ विसर्ज्जनं ५ विश्राणनं ६ वितरणं ७ स्पर्शनं ८ प्रतिपादनं ९ प्रादेशनं १० निर्व्वपणं ११ अपवर्जनं १२ अंहतिः १३। इत्यमरः॥ (सामिककर्त्तव्यक्रियाविशेषः। (यथा, मनुः। ४।९६।
"पुष्ये तु छन्दसां कुर्य्यात् वहिरुत्सर्ज्जनं द्विजः।
माघशुक्लस्य वा प्राप्ते पूर्व्वाह्णे प्रथमेऽहनि"॥)

उत्सर्पिणी, स्त्री, (उत्+सृप्+णिनि+ङीप्। उत्सर्पतीति वाक्ये वाच्यलिङ्ग एव।) जिनानां कालविशेषः। यथा,—हेमचन्द्रः॥
"कालो द्विविधोऽवसर्पिण्युत्सर्पिणीषु भेदतः।
सागरकोटिकोटीनां विंशत्या स समाप्यते॥
अवसर्पिण्यां षड़रा उत्सर्पिण्यां तएव विपरीताः।
एवं द्वादशभिररैर्विवर्त्तते कालचक्रमिदम्"॥
(उद्गमनशीला। यथा, शाकुन्तले ६ अङ्के।
"उत्सर्पिणी खलु महतां प्रार्थना"। इति॥)

उत्सर्य्या, स्त्री, (उत्+सृ+ण्यत्।) प्रजननकालप्राप्ता गौः। इति जटाधरः॥ माल लओनेर उपयुक्त गाइ इति भाषा।

उत्सवः, पुं, (उत्+सू+अच्।) नियताह्लादजनकव्यापारः। तत्पर्य्यायः। क्षणः २ उद्धवः ३ उद्धर्षः ४ महः ५। इत्यमरः॥ (यथा मनुः।३।५९।
"तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च"॥)
उत्सेकः। इच्छाप्रसवः। कोपः। इति मेदिनी॥ (उन्नतिः। अभ्युदयः।
"उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे"॥
इति हितोपदेशे। १।१६४॥)

उत्सादनं, क्ली, (उत्+सद्+णिच्+ल्युट्।) समुल्लेखः। उद्वाहनम्। उद्वर्त्तनम्। इति मेदिनी॥ ("उत्सादनञ्च गात्राणां स्नापनोच्छिष्टभोजने"। इति मनुः। २।२०९॥ विनाशः। उन्मूलनम्॥
"पूर्व्वं क्षत्रवधं कृत्वा गतमन्युर्गतज्वरः।
क्षत्रस्योत्सादनं भूयो न खल्वस्य चिकीर्षितम्"॥
इति रामायणम्। १।७४।२१॥ औषधलेपनादिना व्रणस्य संशोधनम्। तथा,—सुश्रुते।
"अपामार्गोऽश्वगन्धा च तालपत्री सुवर्चला।
उत्सादने प्रशस्यन्ते काकोल्यादिश्च यो गणः"॥
"उत्सादनात् भवेत् स्त्रीणां विशेषात्कान्तिमद्वपुः।
प्रहर्षसौभाग्यमृजालाघवादिगुणान्वितम्"॥
इति चिकित्सितस्थाने २४ अध्याये सुश्रुतेनोक्तम्॥)

उत्सादितं, त्रि, (उत्+सद्+णिच्+क्त।) कृतोत्सादनम्। उद्वर्त्तितम्। निर्म्मलीकृतशरीरम्॥ (यथा, महाभारते ७।८०।१०। प्रतिज्ञापर्व्वणि।
"उत्सादितः कषायेण बलवद्भिः सुशिक्षितैः।
आप्लुतः साधिवासेन जलेन सुसुगन्धिना"॥)

उत्सारकः, पुं, (उत्सार्य्यन्ते प्रभुद्वारतोऽनेन इति। उत्+सृ+णिच्+वुण्।) द्वारपालः। इति हेमचन्द्रः॥ उत्सारणकर्त्ता॥

उत्सारणं, क्ली, (उत्+सृ+णिच्+ल्युट्।) दूरीकरणम्। चालनम्। स्थानान्तरप्रापणम्॥

उत्साहः, पुं, (उत्+सह्+घञ्।) उद्यमः। तत्पर्य्यायः। अध्यवसायः २। इत्यमरः॥ सूत्रम्। इति मेदिनी॥ कल्याणम्। भावविशेषः। इति शब्दरत्नावली॥ (यथा, साहित्यदर्पणे ३य परिच्छेदे।
"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च"॥)
ध्रुवकविशेषः। तल्लक्षणं यथा,—
"उत्साहः स्यात् रसे हास्ये ताले केन्दुकसंज्ञके।
वंशवृद्धिकरः पादैस्त्रयोदशमिताक्षरः"॥
इति सङ्गीतदामोदरः॥

उत्साहवर्द्धनं, क्ली, (उत्साहं वर्द्धयति यत्। उत्साह+वृध+ल्युट्।) उद्यमवृद्धिः। वीररसः। इत्यमरः॥